भारद्वाज विवाह मन्त्राः

१.११.१७. यस्यां मनोऽनुरमते चक्षुश्च प्रतिबद्यते ।
तां विद्यात्पुण्यलक्ष्मीकां किं ज्ञानेन करिष्यति ॥

१.१३.२. या अकृन्तन्नवयन्या अतन्वत याश्च देविरन्तानभितोऽददन्त ।
तास्त्वा देवीर्जरसे संव्ययन्त्वायुष्मतीदं परिधत्स्व वासः ॥

१.१३.३. परिधत्त धत्त वाससैनां शतायुषीं कृणुत दीर्घमायुः ।
बृहस्पतिः प्रयच्छद्वास एतत्सोमाय राज्ञे परिधातवा उ ॥
जरां गच्छासि परिधत्स्व वासो भवा कृष्टीनामभिशस्तिपावती ।
शतं च जीव शरदः सुवर्चा रायश्च पोषमुपसंव्ययस्व ॥

१.१३.४. परीदं वासो अधिधाः स्वस्तयेऽभूरापीनामभिशस्तिपावती ।
शतं च जीव शरदः परूचीर्वसूनि चार्या विभजासि जीवती ॥

१.१३.५. अग्नये जनिविदे स्वाहा । सोमाय जनिविदे स्वाहा ॥

१.१३.६. या तिरश्वी यानूची संराधन्ये प्रसाधन्ये सदसस्पतीं युक्तौ वह जातवेद इति ॥

१.१४.१. अग्निरैतु प्रथमो देवतानां सोऽस्यै प्रजां मुञ्चतु मृत्युपाशात् ।
तदयं राजा वरुणोऽनुमन्यतां यथेयं स्त्री पौत्रमघं न रोदात् ॥
इमामग्निस्त्रायतां गार्हपत्यः प्रजामस्यै नयतु दीर्घमायुः ।
अशून्योपस्था जीवतामस्तु माता पौत्रमानन्दमभिप्रबुध्यतामियम् ॥
मा ते गृहे निशि घोष उत्थादन्यत्र त्वद्रुदत्यः संविशन्तु ।
मा त्वं विकेश्युर आवधिष्ठा जीवपत्नी पतिलोके विराज पश्यन्ती प्रजां
सुमनस्यमानां ॥ द्योस्ते पुष्ठं रक्षतु वायुरूरू अश्विनौ च स्तनं धयन्तं
सविताभिरक्षतु । आ वाससः परिधानाद्बृहस्पतिर्विश्वे देवा अभिरक्षन्तु पश्चात् ॥
अप्रजस्तां पौत्रमृत्युं पाप्मानमुत वाघम् । शीर्ष्णः स्रजमिवोन्मुच्य द्विषद्भ्यः
प्रतिमुञ्चामि पाशम् ॥ पूर्णा पश्चादिमं मे वरुणा तत्त्वा यामि । त्वं नो अग्ने
स त्वं नो अग्ने । त्वमग्ने अयास्ययाश्चाग्नेऽस्यनभिशस्तीश्च यदस्य
कर्मणोऽत्यरीरिचं ॥

१.१५.४. शं नो देवीरभिष्ट्य आपो भवन्तु पीतये । शं योरभिस्रवन्तु न ॥

१.१५.५. देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यां ॥
हस्तेन ते हस्तं गृह्णामि सौभगत्वाय मया पत्या जरदिष्टिर्यथासः ।
भगो अर्यमा सविता पुरन्धिस्ते त्वा देवा अदुर्मह्यं पत्नीम् ॥

अघोरचक्षुरपतिघ्न्येधि शिवा पशुभ्यः शन्तमा प्रजायै ।
क्षुरपविर्जारिभ्यो जीवसूर्वीरसूः स्योना मह्यं त्वादुर्गार्हपयाय देवाः ॥
तां नः पूषञ्छिवतममेरयस्व यस्यां बीजं मनुष्या वपन्ति ।
या न ऊरू उशती विस्रयातै यस्यामुशन्तः प्रहरेम शेफम् ॥
सोमः प्रथमो विविदे गन्धर्वस्ततोऽपरः । तृतीयो अग्निष्टे पतिस्तुरीयस्ते
मनुष्यजाः ॥ सोमो ददद्गन्धर्वाय गन्धर्वोऽग्नये ददत् । रीयं च
पुत्रांश्चादादग्निर्मह्यमथो इमाम् । सरस्वति प्रेदमव सुभगो वाजिनीवति । तां त्वा
विश्वस्य भूतस्य प्रगायामस्यग्रत इति ॥

१.१५.६. सं वां सृजामि हृदये । संसृष्टं मनो अस्तु वां संसृष्टः प्राणो अस्तु वां ॥

१.१५.७. आतिष्ठेममश्मानमश्मेव त्वं स्थिरा भव । प्रमृणीहि दुरस्यून्सहस्व पृतनायत ॥

१.१५.८. विश्वा उत त्वया वयं धारा उदन्या इव । अतिगाहेमहि द्विषः ॥

१.१५.९. इयं नार्युप्रब्रूतेऽग्नौ लाजानावपन्ती ।
दीर्घायुरस्तु मे पतिरेधन्तां ज्ञातयो मम ॥
भगेन त्वा संसृजामि मासरेण सुरामिव ॥

१.१५.१०. इमान्लाजानावपामि समृद्धिकरणान्मम । तुभ्यं च
संवननांस्तदग्निरनुमन्यतामियम् ॥

१.१६.१. एकमिषे विष्णुस्त्वान्वेतु द्वे ऊर्जे विष्णुस्त्वान्वेतु त्रीणि व्रताय विष्णुस्त्वान्वेतु
चत्वारि मायोभवाय विष्णुस्त्वान्वेतु पञ्च पशुभ्यो विष्णुस्त्वान्वेतु षड्रायस्पोषाय
विष्णुस्त्वान्वेतु सप्त सप्तभ्यो होत्राभ्यो विष्णुस्त्वान्वेतु ॥

१.१६.२. सखा सप्तपदा भव सखायौ सप्तपदाबभूव ।
सख्यं ते गमेयं सख्यात्ते मा योषं सख्यान्मे मायोष्ठा ॥

१.१६.३. मम हृदये हृदयं ते अस्तु मम चित्ते चित्तमस्तु ते ।
मम वाचमेकमना शृणु मामेवानुव्रता भव सहचर्या मया भव ॥

१.१६.४. मां ते चित्तं प्रविशतु मां चक्षुर्मामु ते मनः ।
मयि सर्वाणि भूतानि मयि प्रज्ञानमस्तु ते ॥
मधु हे मध्वागाहे जिह्वा मे मधुवादिनी ।
मुखे मे सारघं मधु दत्सु संवननं कृतम् ॥
चाक्रवाकं संवननं यन्नदीभ्य उदाहृतम् ।
यद्देवगन्धर्वो वितस्तेन संवनिनौ स्वः ॥

मां चैव पश्य सूर्यं च मान्येषु मनः कृथा ॥
१.१७.१. आपो हि ष्ठा मयोभुवस्ता न ऊर्जे दधातन । महे रणाय चक्षसे ॥
यो वः शिवतमो रसस्तस्य भाजयतेह नः । उशतीरिव मातरः ॥
तस्मा अरं गमाम वो यस्य क्षयाय जिन्वथ । आपो जनयथा च नः ॥
हिरण्यवर्णाः शुचयः पावका यासु जातः कश्यपो यास्विन्द्रः ।
अग्निं या गर्भं दधिरे विरूपास्ता न आपः शं स्योना भवन्तु ॥
पवमानः सुवर्जनः । पवित्रेण विचर्षणिः । यः पोता स पुनातु मा । पुनन्तु मा देवजनाः । पुनन्तु मनवो धिया । पुनन्तु विश्व आयवः । जातवेदः पवित्रवत् । पवित्रेण पुनाहि मा । शुक्रेण देव दीद्यत् । अग्ने क्रत्वा क्रतूँरनु ॥
१.१७.३. ये वध्वश्चन्द्रं वहतुं यक्ष्मा यन्ति जनामनु ।
पुनस्तान्यज्ञिया देवा नयन्तु यत आगता ॥
१.१७.४. इह गावो निषीदन्त्विहाश्वा इह पुरुषाः । इहो सहस्रदक्षिणोऽभि पूषा निषीदत्व ॥
१.१८.५ ध्रुवक्षितिर्ध्रुवयोनिर्ध्रुवमसि ध्रुवत स्थितम् ।
त्वं नक्षत्राणां मेथ्यसि स मा पाहि पुतन्यत ॥
सप्तर्षयः प्रथमां कृत्तिकानामरुन्धतीं ध्रुवतां ये ह नित्युः ।
षट्कृत्तिका मुख्ययोगं वहन्तीयमस्माकं भ्राजत्वष्टमीत्यरुन्धतीम् ॥
१.१८.७. अग्ने प्रायश्चित्ते त्वं देवानां प्रायश्चित्तिरसि ब्राह्मणस्त्वा नाथकामः प्रपद्ये ।
यास्यां  पतिघ्नो तनूः प्रजाघ्नी पशुघ्नी लक्ष्मिघ्नो जारघ्नीमस्यै तां कृणोति स्वाहा ॥ वायो प्रायश्चित्त आदित्य प्रायश्चित्ते प्रजापते प्रायश्चित्ते त्वं देवानां प्रायश्चित्तिरसि ब्राह्मनस्त्वा नाथकामः प्रपद्ये । यास्यै निन्दिता तनूस्तामितो नाशयामसि स्वाहा ॥
१.१९.१. अमूहमस्मि सा त्वं द्योरहं पृथिवी त्वं सामाहमृक्त्वं तावेहि संभवाव सह रेतो दधावहै पुंसे पुत्राय वेत्तवै रायस्पोषाय सुप्रजस्त्वाय सुवीर्याय ॥
१.१९.६. सं ना मनस्सं हृदयानि सं नाऽभि सं तनुत्यजः ।
सं त्वा कामस्य यात्क्रेणे युञ्जत्यविमोचनाय ॥